# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – आचार्यप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ४** | गुणाः - ७० |
| विषयः – नव्यन्यायः | **कोड – C.C.4.1.3** | समयः – ०३ तः ०६ पर्यन्तम् |
| दिनाङ्कः – ०८/१२/२०१६ | सन्दर्भग्रन्थः – सत्प्रतिपक्षः | |

---

प्रथमान्वितिः (युनिट-१)

प्रश्नः -१ **द्वयोरेकस्य समाधानं सप्रसङ्गं दत्त ।** ०४

(१) उभयं व्याख्यात।

(२) 'नापि व्याप्तिपक्षधर्मतया ज्ञातत्वम्' व्याख्यात।

प्रश्नः -२ **द्वयोरेकस्य व्याख्या कार्या ।** ०८

(१) समानव्याप्तिपक्षधर्मतावत्वं सत्प्रतिपक्षत्वमिति प्रतिपादयत ।

(२) विरुद्धादौ साधनेति दीधितिपङ्क्ति व्याख्यात ।

प्रश्नः -३ **निम्नेषु त्रयाणाम् एकवाक्येन उत्तरं देयम् ।** ०३

(१) विशेषश्च न व्याप्तिभङ्गाभङ्गरूपः कुतः?

(२) भ्रमत्वं चानुगतं कथञ्चिन्निर्वचनीयमिति के?

(३) कथं कृतकृत्यता वर्तते?

(४) बलपदेन के गृह्येते?

(५) सत्प्रतिपक्षः कः ?

द्वितीयान्वितिः (युनिट-२)

प्रश्नः -४ **द्वयोरेकस्य उत्तरं सन्दर्भसहितं देयम् ।** ०४

(१) मणौ साध्यपदप्रयोजनं व्याख्यात।

(२) दीधितौ तदुपस्थित्यभिधानं शिरोवेष्टनेन नासिकास्पर्शमनुधातीत्यस्य सङ्गतिं व्याख्यात ।

प्रश्नः -५ **द्वयोः निबन्धात्मकमुत्तरं लिखत ।** १२

(१) 'साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्यकलिङ्गत्वं तत्त्वमि'ति लक्षणं दलसार्थक्यसहितं प्रतिपादयत।

(२) 'अप्रामाण्यग्रहे सत्प्रतिपक्षत्वाऽसम्पादकत्वात्कार्यप्रतिरोधानुधावनमि'ति दीधितिं व्याख्यात ।

(३) विरिधिबोधकान्यत्व-समानपदसार्थक्ये स्पष्टं व्याख्यात।

प्रश्नः -६ **चतुर्णाम् अतिलघूत्तराणि लेख्यानि ।** ०४

(१) विरोधित्वं किम्?

(२) यत्र बाधो तत्रैव कः दोषः?

(३) योग्यत्वं किम्?

(४) विरोधिपरामर्शः कथं निवेषणीयः?

(५) प्रतिरुद्धकार्यं किम्?

(६) समानत्वं किम्?

तृतीयान्वितिः (युनिट-३)

प्रश्नः -७ **द्वयोरेकस्य उत्तरं सन्दर्भसहितं देयम् ।** ०४

(१) 'युगपदुपस्थितेश्च कारणवशेन स्वपरसाधारणत्वात्' विवृणुत।

(२) 'व्याप्तिपक्षधर्मताभङ्ग एकत्राऽवश्यक' इति प्रतिपाद्य वारयत।

प्रश्नः -८ **एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** १२

(१) दूषकताबीजं दूषकत्वं च यथा गदाधरिं व्याख्यात ।

(२) रत्नकोशकारमतानुसारं सत्प्रतिपक्षलक्षणं व्याख्यात ।

प्रश्नः -९ **एकस्य व्याख्यात्मकमुत्तरं देयम्।** ०४

(१) 'विरोधिवाक्यमात्रस्य समबलत्वाभावात्' व्याख्यात।

(२) 'अनुमितिप्रामाण्यग्राहकाप्रवृत्तिर्दूषकताबीजमित्यन्ये' के ते व्याख्यात।

चतुर्थान्वितिः (युनिट-४)

प्रश्नः -१० **एकस्योत्तरं सन्दर्भसहितं देयम् ।** ०४

**(१)** विप्रतिपत्तिजन्मानं संशयं विशदयत।

**(२)** प्रतिबन्धकत्वं व्याख्यात।

प्रश्नः -११ **एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** ०८

(१) रत्नकोशकारमतस्य आशयः कः इति स्पष्टयत ।

(२) संशयत्वं न विरोधावगाहितानियतमिति अर्वाचीनानां मतं विशदयत।

प्रश्नः -१२ **एकैकवाक्येन त्रयाणाम् उत्तरं लेखनीयम् ।** ०३

(१) विरोधिज्ञानस्य कुत्र तन्त्रत्वम्?

(२) सत्प्रतिपक्षाभ्यां प्रत्येकं स्वसाध्यानुमितिः जन्यते न वा?

(३) परस्परप्रतिबन्धे अनुमितिरुत्पद्यते वा?

(४) चक्षुरादेः अनुमानेन सह विरोधः अस्ति न वा?

(५) व्याप्तिभङ्ग इत्युक्ते कः?

*******

# समाधानानि

कक्षा – आचार्यप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – ४** गुणाः - ७०

विषयः – नव्यन्यायः **कोड – C.C.4.1.3** समयः – ०३ तः ०६ पर्यन्तम्

दिनाङ्कः – ०८/१२/२०१६ सन्दर्भग्रन्थः – सत्प्रतिपक्षः

प्रश्नः- ३

१. एकत्र तद्भङ्गनियमात्।
२. पूर्वपक्षिणः।
३. साध्यप्रसिद्धिमात्रेण।
४. व्याप्तिपक्षधर्मौ।
५. दोषः (हेत्वाभासः)।

प्रश्नः- ६

१. विरोधिपरामर्शादिव्यावृत्तम्।
२. सत्प्रतिपक्षो दोषः।
३. समर्थपदार्थः।
४. अजनितविरोधिबोधकत्वेन।
५. प्रतिरुद्धकार्यकपरामर्शविषयत्वम्।
६. विरोधिबोधानुनुपधायकत्वम्।।

प्रश्नः-१२

१. प्रतिबन्धकत्वे।
२. जन्यते।
३. नोत्पद्यते।
४. नास्ति।
५. व्याप्त्यादिविरहः।